**प्राध्व** त्रि॰ प्रकृष्टोऽध्वा अच्समा॰। १दूरपथे २प्रह्वे नम्रे ३बद्धे च हेमच॰ बं॰ब्री॰। ४बहुदूरगामिनि रथादौ च।

**प्राध्वम्** अव्य॰ प्र+आ+ध्वन–डमि। १आनुकूल्ये २बन्धने ३नम्रतायाञ्च अमरः।

**प्रान्त** पु॰ प्रकृष्टोऽन्तः। १शेषसीमायाम् हेमच॰। २ऋषिभेदे पु॰। ततः गोत्रापत्ये कण्वा॰ फञ्। प्रान्तायन तदपत्ये पुंस्त्री॰। [शब्दार्थक॰।

**प्रान्तदुर्ग** न॰ प्रान्ते दुर्गं नृपाश्रयस्थानभेदः। दुर्गभेदे

**प्रान्तर** न॰ प्रकृष्टमन्तरं व्यवधानं यत्र। १दूरगम्ये पथि। २वृक्षादिच्छायाशून्ये पथि ३वने ४कोटरे च मेदि॰।

**प्रान्तशून्य** पु॰ प्रान्ते शून्यमस्य। छायादिरहिते पथि शब्दर॰

**प्रापणिक** पु॰ प्र+आ+पण–"प्राङि पणिकषः" उणा॰ किकन्। पण्यविक्रेतरि उज्ज्वलद॰।

**प्राप्त** त्रि॰प्र+आप–कर्मणि कर्त्तरि वा क्त। १लब्धे २आसादिते ३भूते अमरः। ४उपस्थिते च।

**प्राप्तकाल** पु॰ प्राप्तः कालोऽस्य। करणयोग्ये काले ३।२।१२२ पा॰ सूत्रे दृश्यम्।

**प्राप्तपञ्चत्व** त्रि॰ प्राप्तं पञ्चत्वं मरणं येन। मृते अमरः। मरणे देहस्य पञ्चभूतात्मकताप्राप्तेस्तस्य तथात्वम्। प्रेतशब्दे दृश्यम्। [हेमादौ शब्दरत्ना॰।

**प्राप्तभार** पु॰ प्राप्तः भारः तद्वहनकालोऽस्य। भारसहे॰

**प्राप्तरूप** त्रि॰ प्राप्तं रूपं येन। १मनोहरे २पण्डिते अमरः। ३रूपवति च।

**प्राप्ति** स्त्री प्र+आप–भावे क्तिन्। १उदये २धनादिवृद्धौ ३लाभे च अमरः। ४प्रापणे ५संहतौ शब्दरत्ना॰ अणिमाद्यष्टविधैश्वर्यमध्ये ६ऐश्वर्यभेदे ऐश्वर्यशब्दे दृश्यम्। बार्हद्रथजरासन्धकन्यकासुताभेदे ७कंसकलत्रभेदे भा॰स॰ १२अ॰। हरिवं॰ ९१अ॰ "अप्राप्तस्यैव या प्राप्तिः सैव संयोग उच्यते" भाषा॰ उक्ते ८संयोगस्वरूपे द्रव्यगुणभेदे च। सा॰द॰उक्ते ९मुखाङ्गभेदे "युक्तिः प्राप्तिः समाधानमिति" मुखाङ्गान्युद्दिश्य "संप्रधारणा चार्थानां युक्तिः, प्राप्तिः सुखागमः" लक्षिता। कामस्य भार्य्याभेदे भा॰ आ॰ २६अ॰। नील॰ता॰ उक्ते दशहस्तभेदे।

**प्राप्तिसम** न॰ गौ॰उक्ते जात्युत्तरभेदे "प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्या विशिष्टत्वात् प्राप्तिसमः" सू॰। "हेतुः प्राप्य वा साध्यं साधयेदप्राप्य वा?। न तावत् प्राप्य। प्राप्त्याऽविशिष्टत्वादसाधकः द्वयोर्विद्यमानयोः प्राप्तौ सत्यां किं कस्य साधकं साध्यं वा?। अप्राप्यसाधकं न भवति। नाप्राप्तः प्रदीपः प्रकाशयतीति। प्राप्त्या प्रत्यवस्थानं प्राप्तिसमः" वात्स्या॰ "प्राप्त्या विशेषादनिष्टापादनेन प्रत्यवस्थानम्" गौ॰वृ॰ ५।७ यथा आत्मा सक्रियः क्रियाहेतुगुणवत्त्वादित्यादौ क्रियाहेतुगुणवत्त्वेनैव किमिति क्रियावत्त्वं साध्यते। किमिति क्रियावत्त्वेन तादृशगुणवत्त्वं न? उभयोरविशेषादिति"।

**प्राप्त्याशा** स्त्री ६त॰। १लाभेच्छायाम् २प्रारब्धकार्य्यस्यावस्थाभेदे "अवस्थाः पञ्च कार्य्यस्य प्रारब्धस्य फलार्थिभिः। आरम्भो यत्न प्रत्याशा नियताप्ति फलागमः" इत्युद्दिश्य "उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवा" इति सा॰द॰ लक्षिता।

**प्राप्य** त्रि॰ प्र+आप–ण्यत्। १गम्ये २लभ्ये च ३व्याकरणोक्ते "क्रियाकृतविशेषाणां सिद्धिर्यत्र न विद्यते। दर्शनादनुमानाद्वा तत्प्राप्यमिह कथ्यते" इत्युक्ते ४कर्मभेदे कर्मन्शब्दे १७३०पृ॰ दृश्यम्। प्र+आप–ल्यप्। लब्ध्वेत्यर्थे अव्य॰।

**प्राप्यकारिन्** त्रि॰ प्राप्य विषयदेशं गत्वा करोति विषयप्रकाशम् कृ–णिनि। विषयदेशं गत्वा विषयप्रकाशकारके चक्षुरादौ इन्द्रिये। तत्र न्यायमते चक्षुष एव प्राप्यकारिता नान्यस्य। वेदान्तमते श्रवणस्यापीति भेदः।

**प्राबोधिक** पु॰ प्रबोधाय हितं ठक्। १उषःकाले शब्दमा॰ प्रबोधः प्रबोधनं तत्र नियुक्तः तत्प्रयोजनमस्य वा ठञ्। २मागधे प्रातःस्तुतिपाठकभेदे।

**प्राभञ्जन** न॰ प्रभञ्जनो देवताऽस्य अण्। स्वातिनक्षत्रे तस्य तद्देवताकत्वात् तथात्वम्। तस्यापत्यम् इञ्। प्राभञ्जनि हनूमति "आयूंषि त्वक्षु निर्भिद्य प्राभञ्जनिरमोचयत्" भट्टिः।

**प्राभव** न॰ प्रभोर्भावः अण्। १प्रभुत्वे २श्रैष्ठत्वे च।

**प्राभवत्य** न॰ प्रभवतो भावः ष्यञ्। विभुत्वे मनुः ८।४१२

**प्राभाकर** न॰ प्रभाकरस्य इदम् तन्मतं वेत्ति वा अण्। १मीमांसकभेदप्रभाकरसम्बन्धिनि २तन्मतज्ञे च।

**प्राभृत** न॰प्र+आ+भृ–कर्मणि क्त। उपढौकनद्रव्ये अमरः। स्वार्थे क। २प्राभृतक तत्रार्थे हारा॰।

**प्रामधि** पु॰ पौलस्त्ये सप्तर्षिमध्ये ऋषिभेदे हरिवं॰ ७अ॰।

**प्रामाणिक** त्रि॰ प्रमाणेन निर्वृत्तः सिद्धः ठञ्। १प्रत्यक्षादिप्रमाणसिद्धे २शास्त्रसिद्धे च स्त्रियां ङीप्। ३हैतुके ४अर्थ्यादाभिज्ञे ५शास्त्रज्ञे ६परिच्छेदके ७प्रमाणकर्त्तरि च।

**प्रामाण्य** न॰ प्रमाणस्य भावः। तद्वति तत्प्रकारकत्वरूपे